श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टपञ्चाशं दशकम् ॥

## दावाग्निमोक्षादिवर्णनम्

त्वयि विहरणलोले बालजालैः प्रलम्ब -
प्रमथनसविलम्बे धेनवः स्वैरचाराः।
तृणकुतुकनिविष्टा दूरदूरं चरन्त्यः
किमपि विपिनमैषीकाख्यमीषाम्बभूवुः ॥ 58.1 ॥

अनधिगतनिदाघक्रौर्यवृन्दावनान्तात्
बहिरिदमुपयाताः काननं धेनवस्ताः।
तव विरहविषण्णा ऊष्मलग्रीष्मताप -
प्रसरविसरदम्भस्याकुलाः स्तम्भमापुः ॥ 58.2 ॥

तदनु सह सहायैर्दूरमन्विष्य शौरे
गलितसरणि मुञ्जारण्यसञ्जातखेदम्।
पशुकुलमभिवीक्ष्य क्षिप्रमानेतुमारा -
त्त्वयि गतवति ही ही सर्वतोऽग्निर्जजृम्भे ॥ 58.3 ॥

सकलहरिति दीप्ते घोरभाङ्कारभीमे
शिखिनि विहतमार्गा अर्धदग्धा इवार्ताः।
अहह भुवनबन्धो पाहि पाहीति सर्वे
शरणमुपगतास्त्वां तापहर्तारमेकम् ॥ 58.4 ॥

अलमलमतिभीत्या सर्वतो मीलयध्वं
भृशमिति तव वाचा मीलिताक्षेषु तेषु।

क्व नु दवदहनोऽसौ कुत्र मुञ्जाटवी सा
सपदि ववृतिरे ते हन्त भाण्डीरदेशे ॥ **58.5** ॥

जय जय तव माया केयमीशेति तेषां
नुतिभिरुदितहासो बद्धनानाविलासः ।
पुनरपि विपिनान्ते प्राचरः पाटलादि -
प्रसवनिकरमात्रग्राह्यघर्मानुभावे ॥ **58.6** ॥

त्वयि विमुखमिवोच्चैस्तापभारं वहन्तं
तव भजनवदन्तः पङ्कमुच्छोषयन्तम् ।
तव भुजवदुदञ्चद्भूरितेजःप्रवाहं
तपसमयमनैषीर्यामुनेषु स्थलेषु ॥ **58.7** ॥

तदनु जलदजालैस्त्वद्वपुस्तुल्यभाभि -
र्विकसदमलविद्युत्पीतवासोविलासैः ।
सकलभुवनभाजां हर्षदां वर्षवेलां
क्षितिधरकुहरेषु स्वैरवासी व्यनैषीः ॥ **58.8** ॥

कुहरतलनिविष्टं त्वां गरिष्ठं गिरीन्द्रः
शिखिकुलनवकेकाकाकुभिः स्तोत्रकारी ।
स्फुटकुटजकदम्बस्तोमपुष्पाञ्जलिं च
प्रविदधदनुभेजे देव गोवर्धनोऽसौ ॥ **58.9** ॥

अथ शरदमुपेतां तां भवद्भक्तचेतो -
विमलसलिलपूरां मानयन् काननेषु ।
तृणममलवनान्ते चारु सञ्चारयन् गाः
पवनपुरपते त्वं देहि मे देहसौख्यम् ॥ **58.10** ॥

॥ इति श्रीमन्नारायणीये अष्टपञ्चाशं दशकं समाप्तम् ॥